# Ribhuproktam Svatmanirupanam

# ઋભુપ્રોક્તં સ્વાત્મનિરૂપણમ્

## Document Information

Text title : Ribhuproktam Svatmanirupanam 1

File name : RRibhuproktaMsvAtmanirUpaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 7 | 25(2)-51(1)||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં સ્વાત્મનિરૂપણમ્

(સોઽસ્મહ્યમ્)

(ઋભુનિદાઘસંવાદે)

શૃણુ ભૂયો મહાશ્ચર્યં નિત્યાનુભવસમ્પદમ્ ॥ ૭.૨૫(૨)॥

દુર્લભં દુર્લભં લોકે સર્વલોકેષુ દુર્લભમ્ ।
અહમસ્મિ પરં ચાસ્મિ પ્રભાસ્મિ પ્રભવોઽસ્મ્યહમ્ ॥ ૭.૨૬॥

સર્વરૂપગુરુશ્ચાસ્મિ સર્વરૂપોઽસ્મિ સોઽસ્મ્યહમ્ ।
અહમેવાસ્મિ શુદ્ધોઽસ્મિ ઋદ્ધોઽસ્મિ પરમોઽસ્મ્યહમ્ ॥ ૭.૨૭॥

અહમસ્મિ સદા જ્ઞોઽસ્મિ સત્યોઽસ્મિ વિમલોઽસ્મ્યહમ્ ।
વિજ્ઞાનોઽસ્મિ વિશેષોઽસ્મિ સામ્યોઽસ્મિ સકલોઽસ્મ્યહમ્ ॥ ૭.૨૮॥

શુદ્ધોઽસ્મિ શોકહીનોઽસ્મિ ચૈતન્યોઽસ્મિ સમોઽસ્મ્યહમ્ ।
માનાવમાનહીનોઽસ્મિ નિર્ગુણોઽસ્મિ શિવોઽસ્મ્યહમ્ ॥ ૭.૨૯॥

દ્વૈતાદ્વૈતવિહીનોઽસ્મિ દ્વન્દ્વહીનોઽસ્મિ સોઽસ્મ્યહમ્ ।
ભાવાભાવવિહીનોઽસ્મિ ભાષાહીનોઽસ્મિ સોઽસ્મ્યહમ્ ॥ ૭.૩૦॥

શૂન્યાશૂન્યપ્રભાવોઽસ્મિ શોભનોઽસ્મિ મનોઽસ્મ્યહં (મહોઽસ્મ્યહં) ।
તુલ્યાતુલ્યવિહીનોઽસ્મિ તુચ્છભાવોઽસ્મિ નાસ્મ્યહમ્ ॥ ૭.૩૧॥

સદા સર્વવિહીનોઽસ્મિ સાત્વિકોઽસ્મિ સદાસ્મ્યહમ્ ।
એકસઙ્ખ્યાવિહીનોઽસ્મિ દ્વિસઙ્ખ્યા નાસ્તિ નાસ્મ્યહમ્ ॥ ૭.૩૨॥

સદસદ્ભેદહીનોઽસ્મિ સઙ્કલ્પરહિતોઽસ્મ્યહમ્ ।
નાનાત્મભેદહીનોઽસ્મિ યત્કિઞ્ચિન્નાસ્તિ સોઽસ્મ્યહમ્ ॥ ૭.૩૩॥

નાહમસ્મિ ન ચાન્યોઽસ્મિ દેહાદિરહિતોઽસ્મ્યહમ્ ।
આશ્રયાશ્રયહીનોઽસ્મિ આધારરહિતોઽસ્મ્યહમ્ ॥ ૭.૩૪॥

બન્ધમોક્ષાદિહીનોઽસ્મિ શુદ્ધબ્રહ્માદિ સોઽસ્મ્યહમ્ ।

ચિત્તાદિસર્વહીનોઽસ્મિ પરમોઽસ્મિ પરોઽસ્મ્યહમ્ ॥ ૭.૩૫॥

સદા વિચારરૂપોઽસ્મિ નિર્વિચારોઽસ્મિ સોઽસ્મ્યહમ્ ।
આકારાદિસ્વરૂપોઽસ્મિ ઉકારોઽસ્મિ મુદોઽસ્મ્યહમ્ ॥ ૭.૩૬॥

ધ્યાનાધ્યાનવિહીનોઽસ્મિ ધ્યેયહીનોઽસ્મિ સોઽસ્મ્યહમ્ ।
પૂર્ણાત્પૂર્ણોઽસ્મિ પૂર્ણોઽસ્મિ સર્વપૂર્ણોઽસ્મિ સોઽસ્મ્યહમ્ ॥ ૭.૩૭॥

સર્વાતીતસ્વરૂપોઽસ્મિ પરં બ્રહ્માસ્મિ સોઽસ્મ્યહમ્ ।
લક્ષ્યલક્ષણહીનોઽસ્મિ લયહીનોઽસ્મિ સોઽસ્મ્યહમ્ ॥ ૭.૩૮॥

માતૃમાનવિહીનોઽસ્મિ મેયહીનોઽસ્મિ સોઽસ્મ્યહમ્ ।
અગત્સર્વં ચ દ્રષ્ટાસ્મિ નેત્રાદિરહિતોઽસ્મ્યહમ્ ॥ ૭.૩૯॥

પ્રવૃદ્ધોઽસ્મિ પ્રબુદ્ધોઽસ્મિ પ્રસન્નોઽસ્મિ પરોઽસ્મ્યહમ્ ।
સર્વેન્દ્રિયવિહીનોઽસ્મિ સર્વકર્મહિતોઽસ્મ્યહમ્ ॥ ૭.૪૦॥

સર્વવેદાન્તતૃપ્તોઽસ્મિ સર્વદા સુલભોઽસ્મ્યહમ્ ।
મુદા મુદિતશૂન્યોઽસ્મિ સર્વમૌનફલોઽસ્મ્યહમ્ ॥ ૭.૪૧॥

નિત્યચિન્માત્રરૂપોઽસ્મિ સદસચ્ચિન્મયોઽસ્મ્યહમ્ ।
યત્કિઞ્ચિદપિ હીનોઽસ્મિ સ્વલ્પમપ્યતિ નાહિતમ્ ॥ ૭.૪૨॥

હૃદયગ્રન્થિહીનોઽસ્મિ હૃદયાદ્વ્યાપકોઽસ્મ્યહમ્ ।
ષડ્વિકારવિહીનોઽસ્મિ ષટ્કોશરહિતોઽસ્મ્યહમ્ ॥ ૭.૪૩॥

અરિષડ્વર્ગમુક્તોઽસ્મિ અન્તરાદન્તરોઽસ્મ્યહમ્ ।
દેશકાલવિહીનોઽસ્મિ દિગમ્બરમુખોઽસ્મ્યહમ્ ॥ ૭.૪૪॥

નાસ્તિ હાસ્તિ વિમુક્તોઽસ્મિ નકારરહિતોઽસ્મ્યહમ્ ।
સર્વચિન્માત્રરૂપોઽસ્મિ સચ્ચિદાનન્દમસ્મ્યહમ્ ॥ ૭.૪૫॥

અખણ્ડાકારરૂપોઽસ્મિ અખણ્ડાકારમસ્મ્યહમ્ ।
પ્રપઞ્ચચિત્તરૂપોઽસ્મિ પ્રપઞ્ચરહિતોઽસ્મ્યહમ્ ॥ ૭.૪૬॥

સર્વપ્રકારરૂપોઽસ્મિ સદ્ભાવાવર્જિતોઽસ્મ્યહમ્ ।
કાલત્રયવિહીનોઽસ્મિ કામાદિરહિતોઽસ્મ્યહમ્ ॥ ૭.૪૭॥

કાયકાયિવિમુક્તોઽસ્મિ નિર્ગુણપ્રભવોઽસ્મ્યહમ્ ।
મુક્તિહીનોઽસ્મિ મુક્તોઽસ્મિ મોક્ષહીનોઽસ્મ્યહં સદા ॥ ૭.૪૮॥

સત્યાસત્યવિહીનોઽસ્મિ સદા સન્માત્રમસ્મ્યહમ્ ।
ગન્તવ્યદેશહીનોઽસ્મિ ગમનારહિતોઽસ્મ્યહમ્ ॥ ૭.૪૯॥

સર્વદા સ્મરરૂપોઽસ્મિ શાન્તોઽસ્મિ સુહિતોઽસ્મ્યહમ્ ।
એવં સ્વાનુભવં પ્રોક્તં એતત્પ્રકરણં મહત્ ॥ ૭.૫૦॥

- -

(ફલં)
યઃ શ‍ૃણોતિ સકૃદ્વાપિ બ્રહ્મૈવ ભવતિ સ્વયમ્ ।
 - -

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં સ્વાત્મનિરૂપણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૭ । ૨૫(૨)-૫૧(૧) ॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 7 . 25(2)-51(1) ..

Notes :
Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Ribhuproktam Svatmanirupanam*
pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*